प्रवेश सं० १५४१५ विषय

नाम आश्वलायनश्रौतसूत्रम् (अ० ५-६)

पत्र सं० १-४९
मौल सं०

अक्षर सं० (पंक्ति) ३२,२६ पंक्ति सं० (पृष्ठे) ७,७

आकार ८.१"×३.७", ६.७"×२.७" लिपि आधार

वि० विवरणम् अशिस्मृत...

001781 न १०२९

पी० एस० यू० पी०—९७ एस० सी० ई०—१९५९—२०,०००

Indira Gandhi National Centre for the Arts

Indira Gandhi National
Centre for the Arts

श्री॰उ॰१ श्रीगणेशाय नमः ॥ ॥ हरिः ओ३म् ॥ ॥सत्राणामुक्तादीक्षाप्रदत्तेनाङ्गमुत्थानि
१ प्रातरनुवाकाद्युदवसानीयान्तान्युत्थानि पत्नीसंयाजान्तानीतराणि द्वादशाहान सम्व
विसर्जने तत्य रवद्भुवाः शस्त्राणामातानोः सूक्तान्येव सूक्तस्थाने स्व हीनेकुदेवतेन
व्यवस्थास्त्वचाः प्रउगे सर्वाहर्गणेषु तायमानरूपाणां प्रथमादङ्गः प्रवर्तने अभ्यासा
तिप्रेषावङ्क उत्तमे शस्त्रपरिधानीयायां उत्तमे वचन उत्तमं चतुरसरं द्विरुक्त्वा प्रणु श्रीः
यां द्वितीयादिषु त्वामृतुसु वाजिनं देवजूतमिति तार्क्ष्यमन्त्रे निष्केवल्यसूक्तानां जातवे १
दसो सुनवाम सो ॥ मित्यग्निमारुते जातवेदस्यानामारंगणीयाः पर्यासान्क हृतो ऽह

ग

रहः शस्त्रानीति होत्रकां द्वितीयादिष्वेवं तानि नर्वाणि सर्वत्रान्यत्राङ्ग उत्तमाहे कलि
कान्यग्निष्टोमे ऽहर्गणमध्यते ऽग्निष्टोमायनेषु वो ऽन्यान्यभ्यासातिप्रेषाभ्यामिति को
लौ निरूहौ तदृणमायां नित्यानि होतुरिति गौतमः संपातादाव तु स्वन्न लोद्च्युत शा
त्वात्वं होत्रकाणामलिगाणगारिं नित्यत्वात्तत्र धर्मान्वयस्य प्रगाथा तन्न सूक्तागमेष्वे
का हि कं तान द्वद्वरे तु ॥१॥ ॥चतुर्विंशे होता जनिष्ट त्याज्यं मानो मित्रावरुणामित्रं
वयं हवामहे मित्रं हुवे पूतदक्षं मयंवां मित्रावरुणा पुरुरूणा विद्या मित्र तिवां स्तुर उ
दितद्दुनिष्कृ ॥ त्रिशामैत्रावरुणस्तोमा हि सुमा हितादष्ट्मिन्द्राग्निनो बृहद्दिवे

Indira Gandhi National
Centre for the Arts

श्री०उ०१ णमंहिरण्ययंसंआदद्दस्वधामन्वित्येकाहेनेन्द्रोदधीचोअस्थभिरुत्तिष्ठन्नोजसासहभि
२ धिविश्वाअपद्विषइतिब्राह्मणाछमिनेदंद्राग्नीआगतंसुतमिद्रअग्नानमोबृहदिति
वेयपयोरिदंमियंवामस्यमन्मनइंद्राग्नीयुवामिमेयज्ञस्यहिस्थऋत्विजेत्यच्छावाक
स्यतेषांयस्मिन्सूक्तेवीरंस्तोत्रियोयस्मिन्छंदःसोनुरूपएकस्तोत्रियेप्यछंदःस्वयोन्योनं
तरःस्यानुरूपोनचेत्सर्वोहर्गणाःषळहोवैकाहिकस्तथासत्यंत्वर्वाचोर्ध्वमनुरूपेभ्यं श्री० २
ऋजुनीतिनोवरुणइंद्रवोविश्वतस्परियत्सोमआसुतेनरइत्यारंभणीयाःशस्त्वास्ता
न्स्ताव्यतिरिक्तानावपेरंश्चतुर्विंशमहाव्रताभिजिद्विश्वजिद्विषुवत्सुसर्वस्तोमसर्वपृ

ष्ठेषूर्ध्वमावापात्प्रतिवांसूरउदितेव्यंतरिक्षमतिरच्छाश्याचाश्वस्यसूक्तइतित्र्वाः
पर्यासाःसर्वत्रचमैत्रावरुणस्यषळहस्तोत्रियउत्तमःसपर्यासस्तद्दैवतमन्यंपूर्वे
पर्यासाःसर्वत्रचमैत्रावरुणस्यषळहःस्तोत्रियउत्तमःसपर्यासस्तद्दैवतमन्यंपूर्वं
स्यस्थानेकुर्वीताऽन्यत्रापिसन्निपातेनदृचंसूक्तंवानंतर्हितमेकामनेहिःशंसे
न्महावालभिदंचेत्तंसेदूर्ध्वमनुरूपेभ्यआरंभणीयाभ्योवानाभाकांस्तत्रचानावपेर
न्नृगायत्रीकारंसंक्षेपःपरिषसृजइतिमैत्रावरुणोयःककुभोनिधारयइतिवांपूर्वांषि
दंद्रोपमातयइतिब्राह्मणाछंसीनाहिमध्यंभराणामित्यच्छावाकः॥२॥मरुत्वती
येप्रेतुब्रह्मणस्पतिरुत्तिष्ठब्रह्मणस्पतइतिब्राह्मणस्पत्यावावपतेपूर्वेनित्याहः

श्रो॰उ॰१
२
इदिंद्रायगायतेनकिःसुदासोरथमितिमरुत्वतीयाऊर्ध्वनित्यात्तुकयाशुभेतिचमरु
त्वतीयेपुरस्तात्सूक्तस्यशंसेदेवंस्थितान्प्रगाथान्प्रशस्याभिप्लवयोरन्वहंपुनःपुनरा
वर्त्तयेयुरेकैकंब्राह्मणस्पत्यानामेवंमरुत्वतीयानांध्रुवइंद्रनिहवोधाय्याश्चत्र्यहत्र्य
हूरथंतरंवानयोरक्रियमाणस्ययोनिंशंसेदेवंरूपवैराजशाक्वररैवतानांचपृष्ठ्यस्तो
त्रियायोन्योर्द्वयोस्तासांविधानमन्वहंताभ्यऊर्ध्वंसामप्रगाथोनुक्तोरथंतरस्याभयंश श्री॰ २
णवच्चनइतिबृहतंइंद्रक्रियातुशरणंत्वमिंद्रप्रतूर्तिषुमोषुत्वावाघतश्चनेतिसद्विपदं
उपसमस्येद्विपदामिंद्रमिद्देवतातयइतीतरेषांपृष्ठ्यएवैकैकमन्वहंतदिदासेतिचपुर

स्तात्सूक्तस्यशंसेदुक्थपात्रंचमसांश्चांतराऽतिग्राह्यान्भक्षयंतिनिष्केवल्येनित्योमरुत्स्व
पंःषावःशंपात्रेणमस्त्रिणः॥३॥होत्रकाणांकयानश्चित्रआभुवत्कयात्वंनऊत्यामाचिद
न्यद्विशंसतेयच्छिद्धिलाजनाइमइतिस्तोत्रियानुरूपौमैत्रावरुणस्यतंवोदस्ममृतीष
हंतत्वायामिसुवीर्यमभिप्रवःसुराधसंप्रसक्षश्रुतंसुराधसंचयथत्वासुतावंतःकईवेदसुतेसचा
विश्वाःपृतनाअभिभूतरंनरंतमिंद्रंजोहवीमियाइंद्रमुजआभरइत्येकाहेष्विंद्रोमदायवा
वृधेमदेमदेहिनोददिःसुरूपकृत्नुमूतयेसुषुम्नेत्रमनऊतयेश्रायंतइवसूर्यंबण्महांअसि
सूर्योदुत्यदर्शतंवपुरुदुत्येमधुमत्तमास्त्वामिंद्रप्रतूर्तिषुत्वामिंद्रयशाअसींद्रकेतुंनआभरेंद्र

श्री०३०१ ज्येष्ठं न आ भर शूर सहस्रमाशतं मम त्वा सूर उदित इति ब्राह्मणाच्छंसिनं स्तोत्रमभिवीविदद्दसुत्तर
४ णिरिति स्रिषा सति त्वामिदाह्यो नरोव यमेन मिदा ह्योयो राजा चर्षणीनां यः सत्राहा विचर्षणिः
स्वादोरित्था विषूवतइत्यादिसोमइन्मदउ भेयदिंद्र रोदसी अववयत्वं ज्ञातक्रतो न किष्टं कर्मणा न
शंन्न त्वा बृहद्धतो अद्रयं उभयं शृणवच्च नं आ तू षस्य पुरूवसो कदाचन स्तरीरसि कदाचन प्रयु
छसीयत इंद्र भयामहे यथा गौरो अपा कृतं यदिंद्र प्रागपागुदग्यथा गौरो अपाकृतमित्यच्छावा श्री
कस्यं स्तोत्रियानुरूपाणां यद्यनुरूपे स्तवीरन्स्तोत्रियो नुरूपं उर्ध्वं स्तोत्रियानुरूपेभ्यः कस्तमिंद्र ४
त्वावसुं कं नव्यो अतसीनां॥कदून स्याकृतमितिकद्वंतः प्रगाथा अपश्चाच इंद्र विश्वा अभित्रानेत्र

त्वणातेब्रह्मयुजा युनज्मि उरुं णो लोकमनुनेषि विद्वानिति कद्वंतं आरंभणीया ऊर्ध्वमारंभणी
याभ्यः सद्यो ह जातइत्यहरहः शस्यं मैत्रावरुणः स्मादइदु प्रतवसे शसद्दृष्किरितीतरा नहीं
नस्कै आसत्योयामित्यहीनसूक्तं द्वितीयं मैत्रावरुण उदु ब्रह्माण्यमितऋवतीतरो वहर
हः शस्यं नूनं सा तइत्यंतमुत्तमं महीनसूक्तानि षळहः स्तोत्रियानावपत्स्रे दुष्यदेवः सविता
हिरण्ययेतिति सवं सहिद्यावापृथिवीयज्ञस्यवोरथ्यमिति वैश्वदेवं पृक्षस्य वृष्णो वृष्णेशा
र्दीयं यजेनवर्द्धतत्याग्निमारुतमग्निष्टोमइदं महरुक्थ्यावा॥८॥अभिप्लवपृष्ठ्याहानि
रथंतरपृष्ठान्यसुजानिं बृहत्पृष्ठानीतराणि तृतीयादिषु पृष्ठस्यान्वहं द्वितीयानिवेरूप

Indira Gandhi National
Centre for the Arts

ऐ॰ ८३॰१ वैराजशाक्वररैवतानि तेषां यथास्थाने त्रिस्त्रायां योनीः शंसेत्सर्वत्र चाम्नायो निमा वैऽन्यत्राश्विनां
द्यज्ञायज्ञीयस्यान्ते क्रियमाणस्यापि सानुरूपं योनिं व्याहावं शंसेदूर्ध्वमितरस्यानुरूपाद्धोत्र
काः परिशिष्टानावापानुद्धृत्य मित्रं वयं हवामहे मित्रं हुवे पूतदक्षं मयं वां मित्रावरुणा नो मित्रा
वरुणेति तृचाः प्रवो मित्रायेति चतुर्णां द्वितीयमुद्धरेत् मित्रयोर्वरुणयोरिति षट्कायेभिरदा
भ्येति तिस्रो मित्रस्य चर्षणीधृत इति च तस्या मैत्र्यो य स्विष्टिते विशदिति वारुणमेतस्य तच्चमाव श्रो॰
पते मैत्रावरुणो निष्कादर्भिकं स्तोमकारणात्तेन समस्तदशेन नेकविंशो द्वः दशस्त्वतुर्विंशो पञ्चदशात्रि
णवं एकविंशात्रयस्त्रिंशो द्वात्रिंशतं चतुश्चत्वारिंशो षट्त्रिंशतमष्टाचत्वारिंशो ए काल्पीयसी

नैकाहेष्वेक भूयसीर्नानारंभणीयान पर्यासां अंत्या एकाहिकास्तृचाः पर्यासस्थानेषु ब्राह्मणा
छंसिनः सुरूपकृत्नुमूतय इति षट्सूक्तान्यावाप उक्तो मैत्रावरुणेन इंद्राग्नी इंद्राग्नी आगतं ता
हुवे ययोरिदमिति न वैयं वामस्य मन्मन इत्येकादशो यज्ञस्य हि स्थ इत्यलाबाकस्यायातिंद्रो
वस इति मरुत्वतीयस्यै मानदं इति निष्केवल्यं प्रथमस्याभिप्लविकस्य मध्यंदिन इत्युक्तं ए
तेशा स्वप्रतीगारहीनसूक्तस्थानेष्वातामिंद्रं यत्र इंद्रः कथा महामिंद्रः शूर्मिंद्र एक इद्धस्ति
ममश्रृंगे इमा मूप्विति च तांश्च सदृशीरिति संपातानेकैकस्य त्रयस्त्रयं उक्ता मरुत्वतीयैर्युजत
मन इदं हुव इति च तस्योदवान्तुव इति वैश्वदेवं ॥५॥ द्वितीयस्य चतुर्विंशोनान्यं वायोयेतेस

Indira Gandhi National
Centre for the Arts

श्री०उ०१ ८ हस्त्विणइति द्वेती व्राः सोमासआगहीत्येकोमादेवादविस्त्रेति द्वे शुक्रस्याधगवाशिरंत्ये
का ऽयं वां मित्रावरुणेति पंचतृचा गार्त्समदं प्रउगमित्येतदाचक्षते विश्वानरस्य वस्पतिमिंद्र
इत्सोमपा एक इति मरुत्वतीयस्य प्रतिपदनुचरा निंद्र सोमं याताऽ इति रवमेति मध्यंदिनो निष्के
वल्यस्योत्तमे विपरीते भारद्वाजो होता चेत्प्रउग्यो चातुर्विंशिकं तृतीयसवनं विश्वोदेवस्येनतु
रित्येका तत्सवितुर्वरेण्यमिति द्वे आ विश्वदेवं सत्पतिमिति तु वैश्वदेवस्य प्रतिपदनुचरा वाज्य श्री ९
प्रउगं प्रतिपदनुचरा श्वो भयोर्युग्मेष्वेवमभिप्लवे ॥१॥ तृतीयस्य त्र्यर्यमा यो जात एवेति म
ध्यंदिनस्तद्देवस्य घृतेन द्यावापृथिवी इति तिस्रोऽनश्वो जातः परावतो य इति वैश्वदेवं वैश्वान

रायपृथिवर्णां धारावरा मरुतं स्तुमग्ने प्रथमो अंगिरा इत्याग्निमारुतं चतुर्थस्योग्रो जज्ञ इति नि
ष्केवल्यं इया म्यग्निमस्य मे द्यावापृथिवी इति तिस्रस्ततमे अप इति वैश्वदेवं वैश्वानरं मनसेति
तिस्रः प्रये शुभं ते जनस्य गोपा इत्याग्निमारुतं पंचमस्य कया शुभा यस्तिग्मशृंग इति मध्यंदिनः
कया शुभीयस्य तुं नव म्युत्तमाऽन्यत्रापियत्र निक्विद्धनं स्यां हृतवती भुवनानामभिश्रियेंद्र क्र
तुभिर्वाजवद्भिरिति तृचौ कदु प्रियाय इति वैश्वदेवं पृक्षस्य वृष्णो वृष्णे शर्धाय नू चित्सहोजा इत्या
ग्निमारुतं षष्ठस्य सावित्रा भव तृतीये नवैश्वानरीयं च कतरा पूर्वा षा सा नक्ते ति वैश्वदेवं प्रयज्यव
इमं स्तोममित्याग्निमारुतमित्यभिप्लवः षळहस्तस्याग्निष्टोमावभितं उक्थ्यामध्य उक्थ्यास्तु

Indira Gandhi National
Centre for the Arts

श्रौ॰७॰३॰१ स्तोत्रियानुरूपौ मैत्रावरुणस्य॥७॥ एवमृषु ब्रवाणि ते आग्निरगामि भारतः प्रवो वाजा अभिद्यवोऽमि
७ प्रयामि वा इत्साप्रमंहिष्ठाय गायत प्रसो अग्ने तवोतिभिरग्निं वो वृधंतमग्ने यं यज्ञमध्वरं यजिष्ठं
त्वा ववृमहे इयः समिधाय आहुत्या ते अग्न इधीमहि युमे स्त्रस्वंद्र सर्पिष इति द्वे एकाचा यिं तमन्ये यो
व मुरा ते वत्सो मनो यमंदाग्ने स्थूरं रयिं भर स्त्र घं वो ऽग्नि तिथिं श्रेष्ठं यविष्ठ भारतं भद्रो नो अग्निराहुतः
य दीघृतेभिराहुतं आधायेअग्निमिंधतद्रमा अभि प्रवो नुम इत्यथ ब्राह्मणाच्छं सिनो ऽभ्रातृव्यो
अना त्वं मा तेअमाजुरा यथे वाह्यसि वीरयुर्वाह्यस्य सूक्ततां तं ते मदं गृणीमसि तन्वमभि प्रगाय
ते च यमु त्वा मपूर्व्य यो न इदमिदं पुरेंद्राय साम गायत स खाय आशिषामहि य एक इद्धिद्यतेय श्रौ॰ ७

इंद्र सोमपातमं इंद्रं नरो गध्यें दुमध्वो मदिंतरं मेतो न्विंद्रं स्तवाम सखाय स्तो हींद्र व्यश्ववत्त्वं न इं
द्राभरं वयमुत्वा मपूर्व्य यो न इदमिदं पुरा ऽऽ याही म इंदव इति समाहार्योनुरूपो ऽभ्रातृव्यो
अना त्वं मा ते अमाजुरा यथे त्वथाच्छावाकस्यंद्र विश्वा अवीवृधन्नुस्थमिंद्राय शंस्यं श्रुधी हवं
तिरश्च्या आश्रुत्कर्ण श्रुधी हवं मसा विसोम इंद्र तं इममिंद्र स्त्रुतं पिब यदिंद्र चित्र मेहनां य स्ते सा
धिष्ठो वसे पुरांभिंदुर्युवा कविर्विघाह्यसि राधसे गायंति त्वा गायत्रिण आ त्वा गिरो रथीरिवेति स्त
त्रानामेकैकं शिष्टा न्येपरन्॥८॥ स्तोमे वर्द्धमानं इमा उ वां भृमयो मन्यमाना इति तिस्र इंद्राको
वामिति सूक्ते श्रुष्टी वां यज्ञो युवां नरा पुनीषे वामिमानि वां भागधेयानीत्येतस्य यथार्थं मैत्रावरु

Indira Gandhi National
Centre for the Arts

श्री०उ०१ णोयस्तस्तंमयोअद्रिभिंयज्ञेदिवइतिसूक्तेअस्तेवसुप्रतरेमायात्विंद्रःस्वपतिरिमांधियमिति
८ ब्राह्मणाच्छंसीतिस्मोर्नुकमितिसूक्तेपरोमात्रयेत्यछावाकः॥४॥ पृच्छ्यस्याभिप्लुवेनोक्तेअह्नी
आद्यआद्याभ्यांतृतीयसवनानिचान्वहमुपप्रयंतइतितुप्रथमेह्न्याज्यमग्निंदूतमितिद्विती
येतृतीयेयुस्वाहीत्याज्यंवायवायाहिवीतयइत्येकावायोयाहिशिवादिवइतिद्वेइंद्रश्चवा
यवेषांसुतानामितिद्वयोरन्यतरांद्विरामित्रेवरुणेवयंमश्विनावहगछतमायाह्यद्रिभिःस्त श्री० ॥८॥
तंसजूर्विश्वेभिर्देवेभिरुतनःप्रियाप्रियास्वित्यॆास्मिंह्रउगमुत्तमेन्तृचमभ्यासाश्वतुरस्सरान राम
वांतृतीयनाभिप्लुविकेनोक्तोमध्यंदिनस्तंतमिद्राधसेमह्रेत्रयइंद्रस्यसोमाइतिमरुत्वतीयस्य

प्रतिपदनुचरौवैरू पंचेत्यष्टंयद्यावइंद्रतेशतंयदिंद्रयावतस्त्वमितिप्रगाथौस्तोत्रियानुरूपौ॥१०॥
चतुर्थह्नि प्रातरनुवाकप्रतिपद्यर्द्धर्चशोन्यूंखोद्वितीयंस्वरमोंकारंत्रिमात्रमुदात्तंत्रिस्तस्यत
स्यचोपरिष्टादपरिमितान्यंचवार्द्धोकारानंनुदात्तानुन्नमस्यतुत्रीन्पूर्वमक्षरंनिहन्यतेन्यूंखय
मानेंतदपिनिदर्शनायोदाहरिष्यामः॥आपो३ ओ० ओ० ओ० ओ० ओ० ओ० ३ओ० ओ० ओ० ओ० ओ० ओ२
ओ० ओ० ओ० रेवतींक्षयथाहिवस्वःक्रतुंचभद्रंबिभृथामृतंन्न॥वायो३ ओ० ओ० ओ० ओ० ओ० ओ०३
ओ० ओ० ओ० ओ० ओ० ओ०३ ओ० ओ० ओ० श्चस्यस्वपत्यस्यपत्नीःसरस्वतीतद्गृणतेवयोधां३मापो३आ
ग्निंनस्वदृक्तिभिरित्याज्यंतस्योत्रमावर्जंतृतीयेषुपादेषुन्यूंखानिनर्दश्चोक्तोन्यूंखःस्वरादिरंत

Indira Gandhi National Centre for the Arts

श्री०३०१ आत्कारश्चतुर्निनर्दउदात्तोप्रथमोत्तमावनुदात्तावितरौउत्तरोनुदात्ततरः।पुनःप्रथमोमकारांतउ
९ त्तमस्तत्दपिनिदर्शनायोदाहरिष्यामः॥आग्निंनस्ववृक्तिभिः॥होतारंत्वावृणीमहे॥यज्ञो२३०
३० ३० ३० ३० ३० ३ ३० ३० ३० ३० ३० ३० ३ ३० ३० ३० यस्तीर्णबर्हिषविवोमदो३ ३०३ ३०३
३० २मंद्रशीरंपावकशोचिषंविवक्षसो२माग्निंनस्ववृक्तिभिः॥होतारंत्वावृणीमहे॥३०३ ३०३०
३०३०३०३०३ ३० ३० ३० ३० ३० ३० ३ ३० ३० ३० मंदेश्वमदेवो३ ३०३ ३०३ ३०३ मोंथामोदै
वोमित्यस्यप्रतिगरः।पिवोदात्तादनुदात्तंस्वरितमुदात्तमितिचतुर्निनर्दस्तदपिनिदर्शनाया
दाहरिष्यामः॥आग्निंनस्ववृक्तिभिः॥होतारंत्वावृणीमहे॥यज्ञो३ ३० ३० ३० ३० ३० ३०३ ३० ३०

३० ३० ३० ३०३ ३० ३० ३० यस्तीर्णबर्हिषविवोमदो३ ३०३ ३०३ ३०३ मंद्रशीरंपावकशोचिषंविवक्ष
सो२माग्निंनस्ववृक्तिभिः॥होतारंत्वावृणीमहे॥३०३ ३०३० ३० ३० ३० ३०३ ३० ३० ३० ३० ३० ३०३
३० ३० ३० मदेश्वमदेवो३ ३०३ ३०३ ३०३ मोंथामोदैवोमित्यस्यप्रतिगरः।प्रथमादर्धकारादन्वर्धु
र्युस्वयंद्वितीयादध्वर्युपरमंहकेयथावासंपादयिष्यंतोमन्येरन्यायोभुक्तोअयामितेदिदिहोता
अवीतांवायोशतंहरीणामिंद्रस्वतान्देवोसोमानामाचिकितानकृकन्नेआनोविश्वाभिरूतिभि
स्त्वमनुनोमदकृणांमदेत्यंद्रजिनेरितुमंचितमिनदीतमदल्वानुषुभंप्रउगंमेकाभितिन्यःप्रथमंतोत्रा
यदेवभिगमहडदेवगोसुतमभद्रतिमरुत्वतीयस्यप्रतिपदनुचरौश्रीदवमिंद्रमरुत्वांइतिमरु
त्वतीयमत्यानिविदंदध्यादेनेकभावस्वक्तानांनेगानेनत्रष्टुपिवासोममिंद्रमदतुत्वतिसोत्रियानुरू

श्री
९

Indira Gandhi National
Centre for the Arts

श्रौ०उ०१ पांक्तः कुह श्रुत इंद्रो युध्मस्येत इति निष्केवल्यं श्रुधी हवीयस्य तु तृचं आ घेदृचं वादिषु न्यूंखं एतं कुह
१० श्रुतीयस्य विराजां मध्यमे षु पादेषु निल्ह इत्थं तिस्रो न्यूंखादिः प्रणवांतः प्रणवे कुह श्रुती
यानां मद्धंर्च्चे श्रश्वेन दुत्तमावर्जनं ते गिरो अपि मृष्यं तु रस्य प्रचो मेद्ध मह्निवृधे मरध्वमिति त्वं च त
त्रासिस्रश्च विराजस्तासां मूर्ध्वमारंभणीया भ्यस्त्वचानां वपरन्नाद्यं मैत्रावरुणं त्वस्योत्तमादि
त्रीस्तानां तृचं ब्राह्मणाच्छंसीनस्य चाच्छावाकोयजाम हइंद्रं वज्रं दक्षिणमिति द्वितीयानेवमेवं श्री
पंचमेद्धनि यस्त्विद्धिमत्य सोमपा इत्येके कमेवमेवं षष्ठेद्धनींद्राय ह्निघो रस्कुरो अनम्नेनेत्येवमे राम
वं ॥११॥ स्तोमे वर्द्धमाने को अद्य नर्यो वनेन वाय आया ह्यर्वाडित्यश्चर्चान्या वपेरं त्रु परिष्टात्पारुच्छेपी १०
नां तेरप्यनति शस्ते एंद्राणि त्रेषु भान्यमरुच्छ्रान्यावपेरन्नत्ते तान्यनोप्याति शंसनमेकयाद्वाभ्यां

---

वा प्रातः सवने परिमिताभिरुत्तरयोः सवनयोः पंचमस्येममू षु वो अतिथिमुषर्बुधमिति नवाज्यं मा नो
यज्ञं दिविस्पृशमिति द्वे आ नो वायो मह्ने तन इत्येकां रथेन पृथुपाजसा बद्धवः सूर चक्षसं द्वमा उ वां दि
विष्टयः पिता मरुतस्य रस्ति नो देवं देवं वो वसे देवं देवं वृह द्रुगायिषे वचइति वा द्वे तं प्रउगं प्रगाथाने के
द्वितीयोत्तमवर्जयं स्यात्त्वजन्ययाविंद्र इत्सोमपा एक इति मरुत्वतीयस्य प्रतिपदनुचरां च वितासीशा
हींद्र पिबतुभ्यमिति मरुत्वतीयं शाक्वरं चेत्पृष्ठं महानाम्न्यः स्तोत्रियस्ता अध्यर्द्धकारं न वप्रकृत्या तिस्रो म
वंति ताभिः पुरीषपदान्युपसंतनुयात्पंचाक्षरशः पूर्वाणि पंच सर्वाणि वा यथा निशांतं योनिस्थाने तु यथा
निशांतं सपुरीषपदा उनमेनसंतानेः स्वादो रित्था विषूवतं उपनो हरिभिः सुतमिंद्र विश्वा अवीवृधन्निति
त्रयस्तृचा अनुरूपाः प्रेरं ब्रह्मेंद्रो मदाय सत्रामदासइति निष्केवल्यं पांक्ते पूर्वस्मिन्मरुत्वतीये पांक्ते निष्के

Indira Gandhi National
Centre for the Arts

पत्र ७१

औ०उ०१ वल्ये आयेन त्रिष्टुबुक्तमेतयोरवसानं चान्तो समप्रगाः गिरिति मरुत्वतीयं शाचष्टते नूष्टोतानिष्ये

११ वल्य निष्केवल्ये ॥१२॥ ॥ इत्याश्वलायनश्रौतसूत्रे उत्तरषट्के प्रथमोऽध्यायः ॥ ॥ ॥ औ ॥

[illegible]

[illegible] औ०

[illegible] नेदानि पूर्णा विषड् ११

[illegible] नि ... नवमिप जनुषोः ॥ ...

इतिः ओरमू ॥ ॥ षष्ठस्य प्रातःसवने नस्थित याज्यानां पुरस्तादन्याः तत्तो भाभ्यामनवानं ताय जन्ति वृ

षन्निंद्र वृषपाणा स इंदवः सुषुमायातमद्रिभिर्वनोति हि सुन्वन्क्षयं परीणसो मा षुवो अस्मदभिता

नि पांस्यो पृणा अग्ने श्रृणुहि लमी ळितोऽभिद्रोतारं मन्ये दास्वंतं दध्य ङ् दमे जनुषं पूर्वो अंगिराः

ग्रावमेवमाध्यंदिनेऽध्यर्द्धौतु तत्रानवानं पिबा सोम मिंद्र सुवानमद्रिभिरिंद्राय हि द्यौ रसुरो अनम्

नेतिं पकु परिष्टां स्तच ऋतुयाजानां प्रेष मृते सोयजं मृच्चं चानवान मुक्तं ऽकृगं तरसोयजन्ति प्र

ष्ये देव मेव यजन्ति तुभ्यं हिन्वानो वसिष्ट गा अप इति द्वादशांऽयं जायत मनुषो धरीमणी त्याज्य

मेकेन द्वाभ्यां च विग्रहं त्रिभिरवसानं चतुर्भिः प्रणवाय चार्द्धर्च शः पारुच्छेप्यः स्तोत्रियं वर्हिरिति

Indira Gandhi National
Centre for the Arts

॥श्री०उ०२॥तृचौसुपुमायातमद्रिभिर्युवांस्तोमभिर्देवयंतोअश्विनाऽवर्महइद्रवृषन्निंद्रांऽस्तःश्रोषळोषू
१२ णोअग्नश्शृणुद्विलमीळितोयेत्वामादिव्यकादशास्थयमददाद्रमसमृणच्युतमितिप्रउगंद्व
चेकाचपंचमंएकपातिन्यउपात्तमंउत्तमेन्तृचमभ्यासांअष्टाक्षरानवांसप्तर्व्योमहानांत्रयइंद्र
स्यमामाइतिंमरुत्वतीयस्यप्रतिपदनुचरोयत्वंरथमिंद्रसयावृषंद्रमरुत्वइतितिस्त्रइतिम
रुत्वतीयमेकनाग्रेवसायंद्वाभ्यांप्रणुयाद्द्वाभ्यामवसायद्वाभ्यांप्रणुयाद्यत्रपछःपारुछ्योर १२
वतंचत्रष्ठरेवतीर्नःसधमादेरेवांइद्रवतःस्तोतेतिस्तोत्रियानुरूपौवेद्रयाह्युपनःप्रघान्वस्या ॥श्री०॥
भूरकइतिनिष्कवल्यंमभित्यंदेवंसवितारमाण्योरित्येकांतत्सवितुर्वरेण्यमितिद्वेदोषोआ

गांहृहृह्वायद्युमद्धयाथर्वणं॥स्तहिदेवंसवितारं॥तमुंष्टुहि्यंतःसिंधुंसूनुंसत्यस्ययुवानं॥अद्रोघवाचं
मुशेवं॥सघानोदेवःसविता साविषदमुपतिः॥उभसुक्षि तीसुधातुरितिवैश्वदेवस्यप्रतिपदनुचरांउद्ध
त्यचोत्तमंमृत्केची वांदमिथारोद्रमितिप्रागुपात्तमायायज्ञेनेत्यावपेतंतस्यार्द्धर्चशःप्रागुत्तमायांउ
र्द्धर्चंचतुर्थ्याःशिष्टशास्त्वांस्वस्तिनोमिमीतामश्विनाभगइतित्वचइतिवैश्वदेवं॥१॥होत्रकाणांद्विपदास्वि
होक्थ्येषुस्तवंतेनउर्ध्वमनुरूपभ्यौविहृतानिशिल्पानिशंमेयुर्मेत्रावरुणस्यांऽग्नेत्वंनोअंतमोऽग्नेम
वसुषमिधासमिद्धइतिंस्तोत्रियानुरूपांवथवालखिल्याविहरंत्तदुक्तंषोळशिनास्तुक्तानांप्रथमद्वि
तीयपछंस्तृतीयचतुर्थअर्द्धर्चशःऋकृशःपंचमषष्ठेव्यतिमर्शवाविहरेत्पूर्वस्यप्रथमामुत्तरस्यद्विती

Indira Gandhi National
Centre for the Arts

श्रौ०उ०२
१३

पर्योत्तरस्य प्रथमां पूर्वस्य द्वितीययां तयोर्नानर्चौ प्रथमद्वितीयाभ्यां पादाभ्यामवस्यंस्त्रथमद्वितीयाभ्यां
प्रणुयांत्तृतीयोत्तमाभ्यामवस्यंस्तृतीयोत्तमाभ्यां प्रणुयादेवं व्यतिमर्शमर्द्धर्चशउत्तरं एवं व्यतिमर्श
मृकशउत्तरं विपरिहरेदेवोत्तमे सूक्ते गायत्रे सर्वत्रेमानिवां भागधेयानीति प्रागुत्तमायां आहूय दूरो
हणं रोहं हंसः शुचिषदिति पच्छोऽर्द्धर्चशं स्त्रिपद्याश्चतुर्थमनवानमुक्त्वा प्रणुत्यावस्यंस्तुन स्त्रिपद्यार्द्ध
र्चशः पच्छ एव सप्तममेतद्दूरोहणं मावां राजानाविति नित्यमेकाहिकमिति नु हौं डिन्नो वथ महावाल
भिदेतान्येव षट् सूक्तानि व्यतिमर्शं पच्छो विहरेद्व्यतिमर्शमर्द्धर्चशो व्यतिमर्शमृकशः प्रगाथांते श्री॰ १३
षुचानुपसंतानं कुगावानमेकपदाः शंसेदिंद्रो विश्वस्य गोपतिरिंद्रो विश्वस्य भूपतिरिंद्रो विश्वस्यच

ततींद्रो विश्वस्य राजतीति च तस्त्रं एकां महाव्रतादाहरे त्रयोविंशतिमष्टाक्षराण्यादाने महानाम्नीभ्यः
सपुरीषाभ्यः षोळशिनोक्तः प्रतिगरोऽन्यत्रैकपदाभ्यांऽवव्हष्येकपदां अविहरंश्चतुर्थे शंसेत्समानम
न्यत्॥२॥ ब्राह्मणाच्छंसिनेंद्र मानुकं भुवनासीषधामतिपंचायावाजं देव हितं सनेमेति स्तोत्रियानुरूपौ
वपप्राच्चदेंद्रेतिसक्कीर्तिस्तस्यार्द्धर्चशश्चतुर्थीमथ वृषाकपिं शंसेद्यथाहोताज्यायांचतुर्थे पंक्तिं शंसेत्तिहा
प्रणवांतश्च प्रतिगरो द्वितीये पांक्तावसानेतस्मादूर्ध्वं कुंतापं तस्यादितश्चतुर्दश वियाहं निनर्दं शंसेत्त्र ती
येषु पादेष्वदात्तमनुदात्तपरं यत्प्रथमं तं निनर्देत्तदपि निदर्शनायोदाहरिष्यामः॥ इदं जना उपश्रुत॥ न
राशंसस्तविष्यते॥ षष्टिंसहस्रानवतिं च कौरमं आरुशमेषु दद्महे ३ माथा मोदैवामित्यस्य प्रतिगरश्चतुर्द

श्री०३०२ स्यामेकेनंद्वाभ्यांचविग्रहःशेषोर्द्धर्चशःएताअश्वाआप्लवंतइतिसप्ततिपदान्यष्टादशवानववाद्यान्यलाबु
२४ कंनिखातकमितिसप्तयदींहनत्कथंहनः स्पर्याकारंपुनःपुनरितिचैनंवितनोतिकिरण्याद्वावितिषळनुष्टु
भौदुंदुभिमाहननाभ्यांजरितरोथामोदैवंकोशबिलेजरितरोथामोदैवंरजनिग्रंथेर्द्धानांजरितरोथामो
दैवंपानद्विपादंजरितरोथामोदैवोत्तरांजनीमांजन्यांजरितरोथामोदैवांत्तरांजनींवर्त्मन्यांजरितरोथा
मोदैवतिप्रतिगरंअवसानेष्विहेत्यंप्रागपागुदगितिचतस्रोद्वेधाकारंप्रणवेनासंतन्वन्न लाबूनिजरित
रोथामोदैवा३मूं॥पृषातकानिजरितरोथामोदैवा३मू॥अश्वत्थपलाशंजरितरोथामोदैवा३मूं॥पिपीलि श्री०
कावटोजरितरोथामोदैवा३मितिप्रतिगरःप्रणवषुंभुगित्यभिगतइतित्रीणिपदानिसर्वाणियथानिशं
१४

तंस्थाजरितरोथामोदैवंपर्णशदोजरितरोथामोदैवंगोशफोजरितरोथामोदैवंतिप्रतिगरंवीमेदेवाअक्रंस
तेत्यनुष्टुप्पत्नीयीयस्यतेजरितरोथामोदैवंहोतानिविष्टीमनंजरितरोथामोदैवंतिप्रतिगरंवादित्याहजं
रितरंगिरोभ्योदक्षिणामनयन्नितिसप्तदशपदान्यादजरितरोथामोदैवंतथाहजरितरोथामोदैवंतिप्रति
गरंव्यत्यासंमध्येप्रणवउत्तमंस्वमिंद्रशर्मरिणेतिभृतंछदस्तिस्रएताअनुष्टुभौयदस्याअंहुभेद्याइत्या
हनस्यांआज्याद्ययोकाश्चतुर्थैकपृन्नरोयदुशाचीरजगंतेतिचैतं॥ई३दुइदुदुदुई३दुदुदुदुदुई३दुदुदु॥
किमयमिदमाहो३उ३उ३उ३माथामोदैवामित्यासांप्रतिगरंदधिक्राव्णोअकारिषमित्यनुष्टुप्सुता
सोमधुमत्तमाइतिचतस्रोवद्रप्साअंशुमतीमतिष्ठदितितिस्रोछामदंद्रमितिनित्यमेकाहिकं॥२॥अथा

Indira Gandhi National
Centre for the Arts

श्री० ३०२ छावाकस्य प्रव इंद्राय वृत्रहंतमायेति स्तोत्रियानुरूपौ वैथैवयामरुद्दक्तो वृषाकपिनां॥ ३०३ ३० ३० ३० ३० ३०
१५ ३०३ ३० ३० ३० ३० ३० ३०३ ३० ३० ३० मदमधार्मदस्यमदिरस्यमदेवा ३ ३०३ ३०३ ३०३ माथामादेवामित्यस्य
प्रतिगरः क्रतुर्जनित्रीति नित्यान्यैकाहिकान्येवमुक्थानि यत्र यत्र द्विपदासु सूक्तवीरं नित्य शिल्पं लिदमहर्वि
श्वजिच्चेतानि दग्निष्टोमो यदिवा क्थ्य स्य द्विपदा सूक्तवीरं नू माध्यंदिन एवोर्ध्वमारंभणीयाभ्यः प्रकृत्या त्रि
ल्पा ग्निरां सेयुं बार्हतान्येव सूक्तानि वालखिल्यानां मैत्रावरुणः सुकीर्तिं ब्राह्मणाच्छंसी वृषाकपिं च पंक्ति
शंसं घ्यां नयदिंद्रेत्यच्छावाकः प्रत्येव यामरुदित्येतदा च क्षतं होतैवयामरुतमाग्निमारुतं पुरस्तान्मारुतस्य पच्छः श्री० १५
समासमुत्तमपदं षष्ठेत्येव पृष्ठ्या हन्यहरहः शंस्य स्यैकभूयसीः शंस्तौ मैत्रावरुणा दूरोहणं रोहेत्संपातसूक्त

एकाहीभवत्सु नत्वेकाहीभवत्स्वहरहः शंस्यानि नारंभणीयानकद्दतंः कद्वतास्थाने नित्यान्प्रगाथान्छस्त्वा
संपातानेवसंपातवत्स्वहीनसूक्तानीतरेषु ततोत्यान्यैकाहिकानि संपातवत्सु तु सर्वस्तोमषु प्राक्तेवैकाहेही
नसूक्तान्यादितस्तृतीयानि सामसूक्तानि सप्रगाथानि सर्वपृष्ठेषु पृष्ठानि पृष्ठ्य संस्था अग्निष्टोमः प्रथमं षोळ
शीच तुर्थमुक्थ्या इतर इति पृष्ठ्यं प्रत्यक्ष पृष्ठो ऽन्यैः परोक्ष पृष्ठं एतैर्वा पक्षे र्वरूपादीनामभावे पृष्ठ्यस्तोमः पव
मानभावे आपकर्ष पृष्ठ्य स्तत्र पृष्ठ्यो द्वौ तु श्व छ्युत नोधसं॥४॥ अभिजिद्दहत्पृष्ठ उभयसामा यद्यपि रथंतरं
यज्ञायज्ञीयस्य स्थाने पिबवाँ ल्लिद्र साम प्रगाथः पिबासोमं तमु ष्टुहीति मध्यंदिने स्तत्र्या रेकाहिके पुरस्ताद
न्यवा शंसेयुरत एवतिगोतमः सप्तदशात्तात्पृष्ठ्यस्य यावत्या यावत्यः कुशानां ननतो दश तावां निष्केवल्येना

Indira Gandhi National
Centre for the Arts

श्री० ३०२ वतिसूक्तां मध्यंदिनाः स्युरिति महान्यायां मरुत्वतीयस्यान्तमेव विपरीतं चानुर्विंशिकं तृतीयसवनं मभिप्लवत्र्य
१६ हः पूर्वः स्वरसामानः स्वराणि लिरुपष्टानि तेषां स्तोत्रियां यज्ञायथा अपूर्व्यमत्स्यपायिते महं एमनं प्रत्यैत
नेत्याद्यावा सर्वेषां वयं घ्नता स्कृता वंतद्इति तिरश्चा बृहत्यां यस्ते माधिष्ठाव सद्इति षकनुष्टुभं इत्यनुरूपास्तो
त्रियं यथायुक्ता बृहती तथानुरूपं स्थायीन्येतानि यथा बृहद्रथंतरं ॥५॥ विषुवान्दिवाकीर्त्य उदित्ते प्रातरनु
वाकः पृथुपाजा अमर्त्य इति षट्धाय्याः सामिधेनीनां सोर्यः सवनीयस्यापालभ्यः सोमापोस्मो वां समुद्रादूर्मि श्री०
रित्याज्यं त्यं सुमेषं कयाशुभेति च मरुत्वतीयं महादिवाकीर्त्यं पृष्ठं विभ्राड् बृहत्पिबतु सोम्यं मधुनमो मित्र १६
स्य वरुणस्य चक्षस इति स्तोत्रियानुरूपौ यदि बृहद्रथंतरे पवमानयोः कुर्युर्योनीएनयोः शंसेद्रथंतरस्य

पूर्वामाद्येभवतोन्याभिरपि सन्निपातं उत्तमस्ति इ सामप्रगाथौ नृणामुत्वानृतमं गीर्भिरुक्थैरितितिस्त्रो
यस्तिग्मशृंगो ऽभि त्यं मेषमिंद्रस्य नु वीर्याणीत्येतस्मिन्नैंद्रीं निविदं शस्त्वां शंसेदेवो नराणि षट्दिवस्थि
दस्य स्कृतद्इत्वमेष प्रपूर्वं रवृषामदः प्रमंहिष्ठाय त्यमूष्विति दूताक्ष्र्यमततस्तस्यैकां शस्त्वा हूयदूरा हण
राहेदिति निष्केवल्यं विकर्णं च ब्रह्मसामोर्ध्वमनुरूपात्रेवोदस्म मृतीषहमभिप्रवः स्कराधसमितिब्रा
ह्मणाच्छंसी स्यतनोध सयायोनीशंसेन्नोध सस्य पूर्वांस्यैतस्यात्तरां मतद्धोत्रकाणां यानि स्थानं यच्च प्र
गाथ आक्रानमतास्यंस्तत्संचाहावपरिमितत्वादुत्तमनाभिप्लुविकेनोक्तं तृतीयसवनमकादिकोतु प्रति
पदनुचरौ भामं च यज्ञायज्ञीयस्य स्थाने पृक्षस्य वृष्णो अरुषस्य नू सहइति स्तोत्रियानुरूपौ मूर्द्धानं दिवो

Indira Gandhi National
Centre for the Arts

श्री०३०२ अरतिंपृथिव्यांमूर्द्धादिवोनाभिरग्निःपृथिव्याइतिवाऽन्यास्मिन्नेवंलिंगास्वतानुरूपंआहृताःस्वरसामानः॥४॥
१७ विश्वजितोग्निनरइत्याज्यंचतुर्विंशेनमध्यंदिनोवैराजंतुपृष्ठंसप्तदशंसंब्रूह्रतश्चयोनिंप्रागेवरूपयान्यदेत्र
काणांपृष्ठानिशाक्करवैरूपरेवतानितयोनीःशंसतिवामदेव्यस्यमैत्रावरुणउक्तंब्राह्मणाच्छंसिनःकालेय
स्याच्छावाकएकादिकोस्तोत्रियावेतयायोनीनांअंतरेणकहूतश्चैतषामेवपृष्ठानांसामप्रगाथांत्सचाम
दासोयोजातएवांभूरकइतिसामसूक्तानिपुरस्तात्सूक्तानांमुक्तंतृतीयसवनंमुत्तमेनपृष्ठ्याद्धेकादिकोनु
प्रतिपदनुचरौबृहद्रथंतरदग्निष्टोमसामंत्वमग्नेयज्ञानामितिस्तोत्रियानुरूपौवितिनवरात्रंःसर्वंग्निष्टोमाउक्थ्या श्री०
नेकेस्वरसाम्नोद्वितीयमाभिपुविकंगौरायुरुत्तरंत्र्यहकृप्तंपूर्वस्मात्त्र्यहात्सवनशोयथांतरंगौरायुरुत्तरा १७

नृषळहकृप्तंयुग्मेभ्योगौरयुजेभ्यंआयुर्दशरात्रेपृष्ठ्यःषळहःपूर्वत्र्यहःपुनश्छंदोमानत्वनुस्थापयेद्रूपं
तृतीयंप्रथमस्यच्छांदोमिकस्यंद्विसूक्तोमध्यंदिनोवैषुवतनिविद्धानेपूर्वेचद्वितीयस्यशंसाममहांमहस्त्रि
त्वमिंद्रपिबासोममभितमस्यद्यावापृथिवीमहांइंद्रोनृवदितिमरुत्वतीयंमपूर्व्यापुरुतमानितांस्तनंकी
र्तित्वमहांइंद्रयोहदिवष्टिदस्यंतमहांइंद्रतुभ्यमितिनिष्केवल्यंतृतीयस्यंद्रःसोहागायत्सामंतिष्ठादृशे
प्रमंदिनेइमाउत्वतिमरुत्वतीयंसंचतेजग्मुरितिसूक्तेआसत्योयातवहंभुवंतनइंद्रियमितिनिष्केवल्यंमाया
द्विवनसेमानुकंवधुरकइतिद्विपदासूक्तानिपुरस्ताद्वैश्वदेवसूक्तानामितिनुसमूळ्हः॥७॥व्यूळ्हश्चतु
र्थ्यस्यात्रेत्र्यहंमध्यंदिनेषुगायत्रांस्तृचानुपसंशस्यंतषुनिविदोदध्यादिमंनुमायिनंहुवेत्यमुवःसत्रासा

Indira Gandhi National
Centre for the Arts

श्रौ॰ ३०२ हंमरुत्वांइंद्रमीढ्वस्तमिंद्रंवाजयामस्यंयंदयेनवाइदंमुपनोहरिभिःसुतमितित्रैष्टुभान्येषांतृतीयसवनान्नि
चतुर्थंहन्यादेवोयातुप्रघावेतिनासिष्टप्रऋभुम्यःप्रभुक्तेतितिवैश्वदेवंवैश्वानरस्यसुमतौकईव्यक्ताअग्निं
नरइत्याग्निमारुतमष्टादशोत्तमेविराजौद्विपदाएकादशमारुतंएकविंशतिर्वैश्वदेवसूक्तंपंचमस्योदुष्यदेवः
सवितादमूनाइतितिस्रोमहीद्यावापृथिवीइहज्येष्ठइतिनतस्वंऋभुर्विश्वास्कषजनमितिवैश्वदेवंहविष्यां
तंवपुर्नुतदग्निर्होतागृहपतिःसराजेतितिस्रइत्याग्निमारुतमुत्तमावैश्वदेवसूक्तेसाध्यासोत्तमाजातवेदस्यं
सर्वत्राध्यासानुपसमस्यप्रणयांत्षष्ठस्यादुष्यदेवइतिगात्संमदेकिमुश्रेष्ठउपनोवाजाइतित्रयोदशार्भवंचत श्री॰
स्रश्चवैश्वदेवसूक्तेतृचमंत्यमुइरेदितिवैश्वदेवंमहश्चिहष्ठ्णांमध्वोवोनामंसप्रत्नथेत्याग्निमारुतमितिपृष्ठ्यः॥५॥

अथछंदोमाःसमुद्रादूर्मिरित्याज्यंभावायोभूषशुचिपाउपनःप्रयाभिर्यासिदाश्वांसमछोनोनियुद्भिःशतिनीभि
रध्वरंप्रसोताजीराअध्वरेष्वस्थांद्यवायवइंद्रमादनासोयावांशतंनियुतोयाःसहस्रमित्येकपातिन्यःप्रयद्वांमित्रा
वरुणास्पूर्द्धन्नागोमतानामत्यारथंनोनोदेवशवसायाहिशुष्मिन्नवायज्ञेषुदेवयंतोअर्चन्नक्षोदसाधायसासस्र
एषतिप्रउगंमाध्यंदिनसूक्तेविपरिहत्येनरयोर्निविदोदध्यादेवमुत्तरयोश्चतुर्थपंचमेअभित्वादेवसवितःप्रतोय
ज्ञस्यशंभुवोऽयंदेवायजन्मनइतितृचोएभिरग्नेदुवइतिवैश्वदेवंनित्यानिद्विपदासूक्तानिवैश्वानराअजीजनद्दिव्य
क्रांसविश्वंप्रतिचाक्लृपदृतूनुत्सृजतेवशी॥यज्ञस्यवयउत्तिरन्॥वृषापावकदीदिह्यग्नेवैश्वानरद्युमत॥जमदग्निभि
राहुतः॥प्रयद्वस्त्रिष्टुभंदूतंवइत्याग्निमारुतं॥१॥द्वितीयस्याग्निंवोदेवमित्याज्यंकुविदंगनमसायवृधासःपीवोअन्नां

Indira Gandhi National
Centre for the Arts

श्री०उ०२ रयिवृधः स्वमेधा उक्थ्यनुषमः स्वदिना अरिश्राद इत्येकपातिन्यं उशंता दूतान दभाय गोपा या वत्तर स्तन्वो यावदा जद इत्येका
१९ दूचं प्रति वां सूर उदिते सूक्तैर्ई नुः प्रत्नस्य काम्यं दुहानां ब्रह्माण इद्रोपयाद्धि विद्वान् ऋध्नो अग्निः स्वमति क्रत्वा अश्वं दुन
स्यानः सरस्वती जुषाणेति प्रउगं हिरण्यपाणिमूतय इति च तत्स्तोम मही द्यौः पृथिवी च न आयुवाना पितरा पुनरिति तत्त्वो
८ देवानामिंद्र इति विश्वे देवं मृतादां नं वैश्वानर मृतस्य ज्योतिषस्पतिं ॥ अजस्रं घर्ममीमहे ॥ दिवि पृष्ठो अरोचताग्निर्वैश्वान
रा महान् ॥ ज्योतिषा बाधते तमः ॥ अग्निः प्रत्नेषु धामसु कामो भूतस्य भव्यस्य ॥ सम्राळेको विराजति ॥ कीळं वः शर्धोऽ
ग्नमृळेत्याग्निमारुतं ॥१०॥ तृतीयस्याग्नमम इत्याज्यं प्रवीरया शुचयो दद्रिरे तेन सत्येन मनसा दीध्याना दिविस्पृशं नार श्री०
जसः पृथिव्यां माविश्ववारा श्विनागतं नोऽयं सोमा मई द्रतुभ्यं सुन्व आतुप्र ब्रह्माणो अंगिरसो नक्षंतं सरस्वती देवयंतो हवंते आ

१९

नो दिवो बृहतः पर्वतादा सरस्वत्यभिनो नेषि वस्य इति प्रउगमेकपातिन्यं उनमो दोषा आगात् प्रवां महि द्यवी अभीति तत्स्वांविं
द्र इषद्दातुनं स्तनारत्ना निधत्तनेत्येकाद्ध चैय त्रिंशातीति वैश्वदेवं वैश्वानरो न ऊतय आप्रयातु परावतः ॥ अग्निर्नः स्व ष्टुती
रुपं ॥ वैश्वानराना आगं मदिमं यज्ञं सजूरुपं ॥ अग्निरुक्थेन वाहसा ॥ वैश्वानरो अंगिराभ्य स्तोमं उक्थं चचाकनत् ॥ एषु द्यु
म्नं स्वर्यमत् ॥ मरुतो यस्य हिप्राग्नय यवाख मित्याग्निमारुतं ॥११॥ दशाम हन्यनुष्टुभां स्थानेऽग्निं नरो दीधितिभिररण्योरिति
त्त्वमाग्नेयक्रतो उषा अपस्व सुस्तमइतिं पंक्ती द्विपदां त्रिरुषस्य आशुभ्रा यातमश्विना स्वश्वेति त्वमाश्विनक्रतो स्तोकस्त
क्तस्यं द्वितीय तृतीययोः स्थानेऽग्न घृतस्य धीतिभिरुभ मुश्वंद्र सर्पिष इत्यतेउ इमापः प्रवहत इत्यतस्याः स्थाने आपो अस्मान्मा
तरः शुंधयं त्वित्यच्छा वा अग्निमवसे प्रत्यस्मा इति तत्त्वयोः स्थानेऽच्छा नः शीरशोचिषं प्रतिष्ठतायनोधृष द् इति तत्त्वाच्छावा

Indira Gandhi National
Centre for the Arts

श्रौ०सू०२ कः परि त्वाग्ने पुरं वयमित्येतस्याः स्थाने ऽग्ने हंसि न्यत्रिणमित्युत्तिष्ठता वपश्यतेत्येतस्याः स्थाने उत्तिष्ठन्नोजसा
२० सहेत्युरु विष्णो वि क्रमस्वेति घृतयाज्याः स्थाने भवा मित्रो न शेव्यो घृतासुतिरित्यहरश्चाहर्गणेषु यत्रैतदहः ह
स्यात्सिनीवाल्या अभ्यस्येदित्येकेनास्मिन्नहनि केनचित्कस्यचिद्विवाच्यमविवाक्यमित्येतदाचक्षते संशयबहि
र्वेदिस्वाध्यायप्रयोगो न वेदीत्येके न व्यंजनेनोपहितेन वार्थः प्रत्यसितां प्रायश्चित्तं जुहुयुरग्ने तमद्याश्वं न स्तोमै
रित्याज्यं पंचाक्षरेण विग्रहो दशाक्षरेण वा त्वा रथं यथा तय इत्येतस्याः स्थाने त्रिकद्रुकेषु महिषो यवाशिरमिति श्री०
सखाय आ शिषामहीति तिस्र उष्मिहो मरुत्वां इंद्रेति मरुत्वतीयं कयानश्चित्र आ भुवदित्येतास्करथंतरं पृष्ठं तस्य
योनिं शंसेद्वृहत आ गाणगारिर्दशरात्रे युग्मान्यत्तां तार्क्ष्ये पेकपदा उपसंशस्येत्र गावानमेकपदाः शंसेदिंद्रावि

२०

श्वस्य गोपतिरिति च न त्व उत्तमयोपसंतानोऽयमिंद्र सोमपातम इति षट्कुष्मिहो युधमस्य त इति निष्केवल्यं तत्सवि
तुर्वृणीमह इत्येतस्याः स्थाने ऽभि त्यं देवं सवितारमोण्योरित्यृभुसूक्त इत्यार्भवं पश्वा न तायुमिति द्विपदं समिद्धम
ग्निं समिधा गिरा गृण इति तृचः श्वं द्विप्रतीकं जातवेदस्यं चतुर्थेनव्यूळ्हस्येतराणि सूक्तानि वामदेव्यमग्निष्टोमसा
मोऽग्निं नरो दीधितिभिररण्योरिति स्तोत्रियानुरूपौ वग्निष्टोम इदमहः स्त्रैर्ध्वं पत्नीसंयाजे म्यः ॥१२॥ गार्हपत्ये जुहु
नीहरमहरमध्वं मिरुधृतिरिह स्वधृतिरग्नेवाट् स्वाहा वाळित्याग्नीध्रीये उपसृजं धरुणं मातरं धरुणो धयन्नु ॥राय
स्पोषमिषमूर्जमस्मासु दीधरत्स्वाहेति सदः प्रसर्पमानेस्मनस्तवतेयर्हिस्तनमन्यतोऽध्वर्यवित्याह्वयीत होता
रितीतर आयं गौः पृश्निरक्रमीदित्युपांशु तिस्रः पराचीः शास्तां व्याख्यास्तरणं चतुर्होतृन्व्याचक्षीत देवा वा अध्वर्योः

Indira Gandhi National Centre for the Arts

श्री॰उ॰२ प्रजापतिर्गृहपतयःसत्रमासततौंहोतस्तथाहोतरित्यध्वर्युःप्रतिगृणात्यवसितेवसितेदशासपदेषुतेषांचित्तिःस्रुगासी३
२९ त्तं॥चित्तमाज्यमासी३त्तं॥वाग्वेदिरासी३त्तं॥आधीतंबर्हिरासी३त्तं॥केतोअग्निरासी३त्तं॥विज्ञातमग्नीदासी३त्तं॥प्रा
णोहविरासी३त्तं॥सामाध्वर्युरासी३त्तं॥वाचस्पतिर्होतासी३त्तं॥मनउपवक्तासी३त्तं॥तेवाएतंग्रहमगृह्णत॥वाच
स्पतेविधेनामन्॥विधेमतेनाम॥विधेस्त्वमस्माकंनाम्नाद्यांगच्छ॥यांदेवाःप्रजापतिंगृहपतयऋद्धिमराध्नुवंस्तामृद्धिं
रात्स्यामहंइत्युपवृजत्यध्वर्युरथप्रजापतेस्तनूरितरंउपांश्वनुद्रवतिब्रह्मोद्यंचान्नादाचान्नपत्नीचभद्राचकल्याणीचा श्री॰
निलयाचापभयाचानाप्ताचानाप्त्याचानाधृष्याचाप्रतिधृष्याचापूर्वाचाभ्रातृव्याचेतितन्वोऽग्निर्गृहपतिरितिहैकआ
हुःसोस्यलोकस्यगृहपतिर्वायुर्गृहपतिरितिहैकआहुःसोंतरिक्षलोकस्यगृहपतिरसौवैगृहपतिर्योसौतपत्येषपतिर्ऋ

तवोगृहाः॥येषांवैगृहपतिंदेवंविद्वान्गृहपतिर्भवतिराध्नोतिसगृहपतीराध्नुवंतितेयजमानाः॥येषांवा
अपहतपाप्मानंदेवंविद्वान्गृहपतिर्भवत्यापसगृहपतिःपाप्मानंहतेपतेयजमानाःपाप्मानंघ्नतेऽध्व
र्युअराट्स्मेत्युच्चैरेषायाज्यैवषट्कारोनानुवषट्कारोत्युक्तेवषट्कारानुमंत्रणंमरात्स्महोतरित्यध्व
र्युःप्रत्याहमनसाध्वर्युर्ग्रहंगृहीत्वामनसाभक्षमाहरतिमानसेषुभक्षेषुमनसोपह्वानभक्षणंमनसात्मा
नमाप्याय्योदुंबरींसमन्वारभ्यवाचंयच्छंत्यानक्षत्रदर्शनात्तत्रानधरान्याणीञ्चिकीर्षेरन्दृश्यमानेष्वध्वर्युमु
खाःसमन्वारब्धाःसर्पंत्यातीर्थदेशाद्युवंतमिंद्रापर्वतापुरोयुधेतिजपंतोऽध्वर्युपथेनत्यक्तेदक्षिणस्यहविर्धा
नस्याधाक्षेणत्यक्तंप्राप्यनरान्नृलांवाचंविसृजंतेयदिहोनमकर्मयदत्यरीरिचाम॥प्रजापतिंतत्पितरमप्येत्वित्य

Indira Gandhi National
Centre for the Arts

श्री०उ०२ थवाचंनिरुक्तवंतेवागेतुवागुपेतुवागुपमेतुवागित्युत्कारदशंसुब्रह्मण्यांत्रिराहूयंवाचंविसृजंतेनित्यस्त्विदवा
२२ त्विसर्गएतावत्मात्रंहोतृकर्मान्यत्रमहाव्रतात्तदेषाभियज्ञगाथागीयते॥अतिरात्रश्चतुर्विंशंषळहावभिजि
त्स्वरां॥विषुवान्विश्वजिच्चैवंछंदोमादशमव्रतं॥प्रायणीयश्चतुर्विंशंपृष्ठ्योभिप्लुवएवच॥अभिजित्स्वरसामानो
विषुवान्विश्वजित्तथा॥छंदोमादशमंचाहरुत्तमंतुमहाव्रतं॥अहीनेकाहःसत्राणांप्रकृतिःसमुदाक्रियते॥यद्य
न्यधीयतेपूर्वधीयतेतंप्रतियामंत्यहानिपंचविंशतिर्येर्विसंवत्सरामितः॥एतेषामेवप्रभवस्त्रीणिषष्टिशतानिय
दितितद्यत्केचनछांदोग्यवाध्वर्यवेवाहोत्रामर्त्याःसमाम्नातानतान्कुर्यादहत्स्वलाद्धोत्रस्यछंदोगप्रत्ययंस्तोमस्तो श्री०
त्रियःपृष्ठसंस्थात्याध्वर्युप्रत्ययंतुव्याख्यानंकामकालदेशदक्षिणानांदीक्षोपसंत्सवसंस्थाक्षानानामेतावत्वंदृवि

२२

षांमुच्चैरुपांशुतायांहविषांचानुपूर्व्यमेतेभ्यएवाहोभ्योऽहीनेकाहानांपश्चात्तरानुव्याख्यास्यामः॥१३॥एतद्धिदंब्रह्म
चारिणमनिराकृतिनेसंवत्सरावमंचारयित्वाव्रतमनुयुन्यानुकोशिनेप्रब्रूयाद्दन्तरमहर्महानाम्नीरयंउदगयनेपू
र्वपक्षेश्राव्यन्ब्रह्मियामात्स्थालीपाकंतिलमिश्रंश्रपयित्वाचार्यायवेदयीतविदितव्रतसंशयानष्टप्ष्ठांलघुमात्राश्छंदा
पकारिताःस्युरन्वारब्धेजुहुयाद्ग्नावृग्निश्चरतिप्रविष्टऋषीणांपुत्रोअधिराजएषः॥तस्मैजुहोमिहविषाघृतेनमा
देवानांमोमुहद्भागधेयंमाअस्माकंमोमुहद्भागधेयंस्वाहा॥यातिरश्चीनिपद्यतेऽहंविधरणीइति॥तांत्वाघृतस्यधा
ग, रयांयजेसंधनीमहंस्वाहा॥यस्मैत्वाकामकामायवयंसम्राड्यजामहे॥तमस्मभ्यंकामंदत्वाथेदंत्वंघृतंपिबस्वाहा॥
अयंनोअग्निर्वरिवःकृणोत्वयंमृधःपुरएतुप्रभिंदन्॥अयंशत्रूञ्जयतुजर्हृषाणोऽयंवाजंजयतुवाजसातौस्वाहा॥

Indira Gandhi National
Centre for the Arts

श्री०उ०२ असूर्यं त्येचानुमत्येच स्वाहा॥ प्रदात्रे स्वाहा॥ व्याहृतिभिश्च पृथग्घुला हुतं स्थालीपाकं सर्वमशानेति भुक्तवंतुमपामंज
२१ लिपूर्णमादित्यमुपस्थापयेत्वं व्रतानां व्रतपतिरसि व्रतं चरिष्यामि तच्छकेयं तेन शकेयं तेन राध्यासमिति समाप्य सं
मील्यवाचं यच्छेत्कालमभिसमीक्षमाणो यदा समयिष्यादाचार्येणेकरात्रमध्यायोपपादनात्त्रिरात्रं वानित्याध्या
मभि यनं तमेव कालं समीक्षमाणं आचार्यो हुते नवा समां त्रिः प्रदक्षिणं शिरः समुखं वेष्टयित्वा हुतं कालमेवं भूतां स्वपन्ना
चेति तं कालमस्वपन्नासीतानुवक्ष्यमाणं पराजितायां दिश्यग्निं प्रतिष्ठाप्यासिमुदकमंडलुमश्मानमित्युत्तरतोग्नेः
कृत्वा वत्सतरीं प्रत्यगुदगसंश्रयणे बध्वा पश्चादग्नेराचार्यस्तृणेषूपविशेत् पराजितां दिशमभिसमीक्षमाणो ब्रह्म
चारी लेपानुपरिमृज्य प्रदक्षिणमग्निमाचार्यं च कृत्वोपसंगृह्य पश्चादाचार्यस्योपविशेत्तृणेष्वेवं प्रत्यग्दक्षिणाभि श्री०

समीक्षमाणः पृष्ठेन पृष्ठं संधाय ब्रूयान्मनसा महानाम्नीर्भो ३ अनुब्रूहीति पुनः पृष्ठानुक्तो शिनेसंमील्य वानुब्रूया
त्स पुरीषपदास्त्रिरनूच्यानुच्यार्ष्मीर्षमादित्यमीक्षयेन्मित्रस्य त्वा चक्षुषा प्रतीक्षे मित्रस्य त्वा चक्षुषा समीक्षे मित्र
स्य वश्चक्षुषानुवीक्षद् इति दिशः ससंभाराः पुनरादित्यं मित्रस्य त्वा चक्षुषा प्रतिपश्यामि यास्मान्द्वेष्टि यं च वयं द्विष्म
स्तं चक्षुषा हंतु नेंद्रच्छलिति भूमिमुपस्पृशेदस्नइळानमइळानम ऋषिभ्यो मंत्रकृद्भ्यो मंत्रपतिभ्यो नमो वा अस्तु
देवेभ्यः शिवा नः शंतमा भवं सुमृळीका सरस्वति मा ते व्योम संदृशि॥ भद्रं कर्णेभिः शृणुयाम देवाः शं न इंद्राग्नी भव
तामवोभिः स्तुष जनं सुव्रतं नव्यसीभिः कया नश्चित्र आभुव दिति तिस्रः स्योना पृथिवि भवेति समाप्य समानं भास्व
र्जमेषद्वया स्वाध्यायधर्मआचार्यवद्दकः फाल्गुनाद्याः श्रवणायामनधीतपूर्वाणामध्यायस्तेष्वाद्यधीतपूर्वाणाम्

Indira Gandhi National
Centre for the Arts

श्रौ०उ०२ २४ धीतपूर्वाणाम्॥ ॥१४॥ ॥इत्याश्वलायनश्रौतसूत्रे उत्तरषट्के द्वितीयाध्यायः समाप्तः॥ ॥श्रीकृष्णार्पणमस्तु॥ ॥
हरिः ओ३म्॥ ॥उक्तप्रकृतयोऽहीनैकाहाः सिद्धेरहोभिरक्रामतिदेशान तिदेशात्वेकाहो ज्योतिष्टोमो द्वादशश
त दक्षिणस्तेन शस्यमेकाहानां गो आयुषी विपरीते द्व्यहानां त्र्यहाणां पृष्ठ्यत्र्यहः पूर्वाभिप्लवत्र्यहो वैवं प्रायाश्च दक्षि
णा अर्वागतिरात्रेभ्यः साहस्रास्त्वतिरात्रा द्व्यहास्त्र्यहाश्च यभूयां सत्र्यहादहीनाः सहस्रं तथा त्र्यहप्रसंख्यायान्व
हं ततः सहस्राणि समावत्त्वं दक्षिणा नयेयुरतिरिक्तास्तूत्तममधिकां अतिदिशानां सोमपृष्ठसंस्थान्यत्वादनन्यभावो
नित्यानेमित्तिकानिकारं माध्यंदिने तु होतुर्निष्केवल्ये स्तोमकारितं शस्यं तत्रापजननस्तार्क्ष्यवर्जमग्रे सूक्तानां हानौ श्रौ० २४
तत एवोद्धारो यथावर्गं विवृतस्तोमाः स्युः स्तृचा एव तत्र सूक्तस्थानेषु यथा नित्यानि विदोभ्युदियात्॥१॥ उक्तानि चातुर्मा

स्यानि सोमान्वक्ष्यामः पर्वणां स्थाने पृपकानेकं परिधौ पशुं नियुंजंति वैश्वदेव्याः स्थाने प्रथमं पृष्ठ्यादर्जनिष्ठाउग्रउग्रो
जज्ञ इति मध्यंदिने एकाहिका होत्राः सर्वत्र प्रथमसांपातिकेष्वहःस्वकाही भवत्स वैश्वानरपार्जन्ये हविषी अग्नीषोमी
यस्य पशोः पशुपुरोळाशान्वायातयेयुः प्रातःसवनिकेषु पुरोळाशेषु वैश्वदेव्या हवींष्यन्वायातयेयुर्वैश्वदेवः पशु
र्बार्हस्पत्यानूबंध्यो वरुणप्रघासस्थाने द्व्यह उत्तरस्याह्नः प्रातःसवनिकेषु पुरोळाशेषु वरुणप्रघासहवींष्यन्वा
यातयेयुर्मारुतवारुणौ पशू मैत्रावरुण्यनूबंध्याग्निष्टोम ऐंद्राग्नस्थाने साकमेधस्थाने त्र्यहातिरात्रां तां द्वि
तीयस्याह्नोनुसवनं पुरोळाशेषु पूर्वेद्युर्हवींषि तृतीयमहन्युपांश्वंतर्यामौ हुत्वा पौर्णदर्वं प्रातःसवनिकेषु क्रैडिनं
माध्यंदिनेषु माहेंद्राण्यंतरेण घृतयाज्यं दक्षिणमार्जलीये पित्र्यां तत्रोपस्थानं यथा नतिप्रणीयचरतामनूबंध्या

Indira Gandhi National
Centre for the Arts

श्रौ०उ०३ याः पशुपुरोळाशं आदित्यमन्वायातयेयुः रात्र्यैंद्राग्नैकादशिनाः पशवः सौर्यानूबंध्योऽग्निष्टोमः शुनासीरीयायाः
२५ स्थानं प्रातःसवनिकेषु पुरोळाशेषु शुनासीरीयायाहवीष्यन्वायातयेयुर्वायव्यः पशुराश्विन्यनूबंध्यान्वहं पंचा
शाच्छादक्षिणाः ॥२॥ अथ राजसूयाः पुरस्तात्फाल्गुन्याः पौर्णमास्याः पवित्रेणाग्निष्टोमेनाऽभ्यारोहणीयेन य
जेत पौर्णमास्यां चातुर्मास्यानि प्रयुंक्ते नित्यानि पर्वाणि च काम्यां तु पर्वांतरेषु चरेत्यहर्विपर्ययं पक्षविपर्ययं वा
संवत्सरांते समानपक्षेऽभिषेचनीयदशपयाउक्थ्या बृहत्पृष्ठउभयसामाऽभिषेचनीयः संस्थितमरुत्वतीयं श्री०
दक्षिणत आहवनीयस्य हिरण्यकशिपावासीनोऽभिषिक्ताय पुत्रामात्यपरिवृताय राज्ञे शौनःशेपमाचक्षीत
हिरण्यकशिपावासीन आचष्टे हिरण्यकशिपावासीनः प्रतिगृणातीति यशो वै हिरण्यं यशसैवैनं तत्समर्द्धयं त्यो

२४

मित्यृचः प्रतिगर एवं तथेति गाथायां ओमिति वै दैवं तथेति मानुषं दैवेन चैवैनं तन्मानुषेण च पापादेनसः प्रमुंच
ति तस्माद्यो राजा विजिती स्यादप्ययजमान आख्यापयेतैव तच्छौनःशेपमाख्यानं न हास्मिन्नल्पं चनैनः परि
शिष्यते सहस्रमाख्यात्रे दद्याच्छतं प्रतिगरित्रे यथास्वमासनं संसृपहिर्भिश्चरित्वा दशपयेन यजेत तत्र दश दशै
कैकं चमसं भक्षयेयुर्नित्यानूप्रसंख्यायेतराननुप्रसर्पयेयुर्ये मातृतः पितृतश्च दश पुरुषं समनुष्ठिता विद्यातपो
भ्यां पुण्यैश्च कर्मभिर्येषामुभयतो नाब्राह्मण्यं निनयेयुः पितृत इत्येके नवग्वासः कृतसोमास इंद्रसखा ह यत्र स
खिभिर्नवग्वैरिति निविद्धानयोराद्यं सूक्तमुखीय इत्युक्त एते प्रतीयादुत्तर आपूर्यमाणपक्षे केशवपनीयो बृहत्पृष्ठो
तिरात्रौ द्वयोर्मासयोर्व्युष्टिद्व्यहोऽग्निष्टोमः पूर्वमहः सर्वस्तोमोतिरात्र उत्तरमुत्तर आपूर्यमाणपक्षे क्षत्रस्य धृतिरग्नि

Indira Gandhi National
Centre for the Arts

श्रौ०३०२ षोमः॥२॥इतिराजसूयान्यायकृप्ताश्चदक्षिणांअन्यत्राभिषेचनीयदशपेयाभ्याममभिषेचनीयेतुद्वात्रिंशतंद्वात्रिंश
२६ तंसहस्राणिपृथङ्मुख्येभ्यःषोडशषोडशद्वितीयिभ्योऽष्टावष्टौतृतीयिभ्यश्चत्वारिचत्वारिपादिभ्यःसंसृपेष्टीनांहि
रण्यमामाग्नेय्यांवत्सतरीसारस्वत्यामवध्वस्तःसावित्र्यांश्यामःपौष्ण्यांशितिपृष्ठोवार्हस्पत्यायांमृषभऐन्द्र्यांमहानि
रष्टोवारुण्यांसाहस्रोदशपेयेइमाश्चादिष्टदक्षिणाःसौवर्णःस्रगुद्गातुरुक्मःप्रस्तोतुर्धेनुःप्रतिहर्तुरजःसुब्रह्मण्या
येहिरण्यप्राकाशावध्वर्योराजतौप्रतिप्रस्थातुर्द्वादशपष्ठौह्यौगर्भिण्योब्रह्मणोवशामैत्रावरुणस्यरुक्महोतुर्ऋ
षभोब्राह्मणाच्छंसिनःकार्पासंवासःपोतुःक्षौमीवराशीनेष्टुरेकयुक्तंयवाचितमच्छावाकस्याऽनड्वानाग्नीध्रस्यवत्सत श्री०
र्युन्नेतुस्त्रिवर्षःसांडाग्रावस्तुतः॥४॥उशनसःस्तोमेनंगरगीर्णमिवात्मानंमन्यमानोयजेतोशनायत्सदस्येरयातं॥ २६

त्वमपायदेवेतुर्वशायेतिसूक्तमुखीयंगास्तोमभूमिस्तोमंवनस्पतिसवानांनत्ताअवीरणुककाटोअश्रुतेनतानरां
तिनदमातिनस्करोबलिशापर्वतानांदृळ्हाचिद्यावनस्पतीनुंदेवेभ्योवनस्पतेहवींषिवनस्पतेरशनयानियूयत्ति
सूक्तमुखीयांअधिपत्यकामोब्रह्मवर्चसकामोवाबृहस्पतिसवेनयजेततस्यतृचाःसूक्तस्थानेष्वग्निर्देवेषुराजतीत्या
ज्यंयस्तस्तंभधुनेतयइतिसूक्तमुखीयेइंद्रमरुत्वइहन्टृणामुक्तेतिमध्यंदिनेउदुष्यदेवःसविताहिरण्ययांघृतवती
भुवनानामभिश्रियेंद्रऋभुभिर्वाजवद्भिःसमुक्षितंस्वस्तिनोमिमीतामश्विनाभगइतिवैश्वदेवंवैश्वानरंमनसाग्निं
निचाय्यप्रयंतुवाजास्तविषीभिरग्नयःसमिद्धमग्निंसमिधागिरागृणइत्याग्निमारुतंहोत्रकाऊर्ध्वस्तोत्रियानुरूपेभ्यः
प्रथमोत्तमांस्तृचान्छंसेयुःप्रगाथेभ्यस्तुमाध्यंदिनेऽनुसवनमेकादशैकादशदक्षिणाएकादशैकादशावासहस्रा

Indira Gandhi National
Centre for the Arts

श्रौ०उ०२ णिशतानिवा॰श्चामाध्यंदिनेधिकोभुवाभ्रातव्यवानधिवुभूषुर्यजेतसद्यस्क्रियानुक्रियांपरिक्रियावास्वर्गकामंए
२७ कत्रिकेणत्र्यकेनवान्नाद्यकामोगोतमस्तोमेनयइछेद्दानकामामेप्रजास्यादित्येतेषांसमा॰॰रास्यमुक्तंबृह
